१०) धर्मशास्त्रकार्यग्रंथ ॥

विवादार्णवभंजन

~~नं० ६५३-घ~~ नं० ६५३-घ

विवादार्णव सेतु: (धर्मशास्त्रम्)

पत्राणि २१३ (अपूर्णम्)

कर्त्ता आचार्यचूडामणिनाथ भट्ट:

६५३ →

नं० ६५३-घ

विवादार्णवसेतु

२१३ पत्राणि

धर्मशास्त्र

अपूर्ण

१ श्रीगणेशाय नमः श्रीसरस्वत्यै नमः ॥ विश्वेषां शरणं नवाम्बुदरुचिः सम्यक्कृचिन्तामणिर्यः प्रत्यूहतमोविनाशमिहिरः की
र्त्तिश्रीनाशनः संसारैकमहार्णवे निपततां निस्तारबीजं नृणां गोविन्दैकृपया सुरासुरगणैर्वंद्यः श्रियं पातु वः १ चण्डे
श्वराधीश्वरविश्वरूपामितानेककारहलायुधौ च श्रीकृष्णवाचस्पतिधर्मरत्नकृतस्य याश्रीकरशूलपाणी २ गोविं
दलक्ष्मीधररत्नकार आचार्यचूडामणिनाथभट्टः वाक्यानि चैषां सुविशय्य कर्मोगन्थं विवादार्णवभंजनाख्यं ३ इह
वाक्यानि वर्णादेः सप्तिर्वर्णसवृत्तयः राजप्रशंसानिबद्धमंवि हूनादिलक्षणं राजधर्मेण दानेह व्यादिविधिब
न्धकाः ऋणादानोद्धरणयोर्विधिर्दायमिह्युर्णा म्नातादीनां न त्रयं सामधिकारिविवेचनं स्त्रीधनस्य स्वरूपं तदधि
कारिनिरूपणं भागानर्हस्वदायानामविभाज्यविभाज्यता पितृकृतविभागश्चभ्रातृभाग विधिस्तथा संसृष्टानां गम० १

विभागश्च विदेशागतवंटनं निन्हुतस्य विभागश्च भागसंदेहनिर्णयः भुक्तिर्व्यवहारस्तस्मादि भाषापादस्ततः परं
त्तरपादक्रियापादौ ततो निर्णयपादकः निक्षेपविधिरस्वामिविक्रये च विधिस्तथा विधिस्तदनश्च संभूयसमुत्था
नेत्र भण्यते कर्षकादेर्भागविधिस्तथादृणप्रदानिकं अत्रादेयदत्तादत्तानां विधिरुच्यते भृतकानां विधिस्तत्र
त्र दासस्य मोक्षाधिकारिणो वेतनस्वामिपालस्त्रीपण्यानां विधिरुच्यते विक्रीयासंप्रदानञ्च क्रीत्वानुशयउच्यते
सीमाविवादे च विधिः कृष्टाकृष्टे विधिस्तथा समयस्य विधिस्तत्र सस्यस्वानदमस्तथा सस्यस्वानेप्यदंड्याश्च वा
क्पारुष्यविधिस्तथा विधिस्तु दंडपारुष्येन या स्तेयनिरूपणं प्रकाशतस्करदमो प्रकाशचौर्यदंडनं चौरान्वेषण
चौर्यातिदेशापवादनिर्णयः साहसे तु दंडभेदो घातकान्वेषणं ततः स्त्रीसंग्रहणनृदंडो परदारगमे दमः स्त्रीपुंधर्म

२
2

निर्णयस्य प्रकीर्णकमतःपरं वहुधाविधयस्तत्र विधिदंडाश्रिताःपुनः अथ सृष्टिः तत्र महाभारतं महाभूतानि भूता
त्मा महात्मा पुरुषोत्तमः वायुर्ज्योतिस्तथा चापः खं च गां चानुकल्पयत् स सृष्ट्वा पृथिवीं चैव सर्वभूतेश्वरः प्रभुः अप्से
व शयनं चक्रे महात्मा पुरुषोत्तमः भास्करप्रतिमं दिव्यं नाभ्यां पद्ममजायत ब्रह्मा सम्भवत्तत्र सर्वभूतपितामहः
ततः कृष्णो महाभागः पुनरेव युधिष्ठिर ब्राह्मणानां शतं श्रेष्ठं मुखाद्देवासृजत्प्रभुः बाहुभ्यां क्षत्रियशतं वैश्यानामूरु
तः शतं पद्भ्यां शूद्रशतं चैव केशवो भरतर्षभ स एवं चतुरो वर्णान्समुत्पाद्य महायशाः अध्यक्षः सर्वभूतानां धाता
रमकल्पयत् एतानि वचनानि नक्रमिकानि किंतु सवहित पठितानि अथैषां वृत्तिः तत्राह मनुः अध्यापनमध्य
यनं यजनं याजनं तथा दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविकाःया राम ३
२

जनाध्यायने चैव विशुद्धाच्च प्रतिग्रहः त्रयोधर्मा निवर्त्तंते ब्राह्मणात्क्षत्रियंप्रति अध्यायनं याजनंच तृतीयश्च प्रतिग्रहः
वैश्यंप्रति तथैवेते निवर्त्तेरन्निति स्थितिः न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशु
कृषी विशः आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य तु रक्षणम् वार्ताकर्मैव वैश्य
स्य विशिष्टानि स्वकर्मसु अस्य ब्राह्मणस्य षण्णामध्यायनादीनां षण्णां मध्याद्याजनमध्यायनं द्विजातिभ्यो धनं लिप्सेत प्रश
स्तेभ्यो द्विजोत्तम इति वचनात् निर्दोषाद्द्विजातेः प्रतिग्रहश्चेत्येतानि त्रीणि कर्माणि जीवनार्थानि ज्ञेयानि ब्राह्मणापे
क्षया क्षत्रियस्याध्यायनयाजनप्रतिग्रहाख्यानि वृत्त्यर्थानि त्रीणि कर्माणि निवर्त्तंते अध्ययनयागदानानि तु तस्यापि
भवंति यथा क्षत्रियस्याध्यायनयाजनप्रतिग्रहा निवर्त्तंते तथा वैश्यस्यापीति शास्त्रव्यवस्था यस्मान्मनुः प्रजापतिः तौ

३ क्षत्रियवैश्यौ प्रतिग्रहानिवृत्त्यर्थौ निकर्त्तव्यत्वेनोक्तवान् एवं च वैश्यस्याप्यध्ययनयागदानानि भवन्ति शस्त्रस्य खड्गादि
3 अस्त्रस्य बाणादि धारणं प्रजारक्षणाय क्षत्रियस्य वृत्त्यर्थं वाणिज्यपशुपालनकर्षणानि वैश्यस्य जीवनार्थानि ध
र्मार्थाः पुनरनयोर्दानाध्ययनयागा भवन्ति वेदाभ्यासोऽध्यापनं वृत्त्यर्थानां सहोपदेशात्तत्र च ब्राह्मणस्य प्रजारक्ष
त्रियस्य वाणिज्यपशुपाल्ये वैश्यस्य एतान्येतेषां वृत्त्यर्थकर्मसु श्रेष्ठानीत्यर्थः अधुनापद्धर्ममाह स एव ॥ अजीवं
स्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः उभाभ्यामप्यजीवंस्तु कथं स्यादिति चे
द्भवेत् कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकां वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोपि वा हिंसाप्रायां पर
धीनां कृषिं यत्नेन वर्जयेत् इदं नु वृत्तिवैकल्यात्त्यजतो धर्मनैपुणं विट्पण्यमुद्धृतोद्धारं विक्रेयं वृत्तिवर्द्धनं यथोक्ते ३.

नाध्यापनादिस्वकर्मणा ब्राह्मणो नित्यकर्मानुष्ठानकुटुंबवर्त्तनपूर्वकमजीवन् क्षत्रियधर्मेण ग्रामनगररक्ष
णादिना जीवेत् यस्मात्क्षत्रियधर्मोऽस्य सन्निकृष्टा वृत्तिः उभाभ्यां स्ववृत्तिक्षत्रियवृत्तिभ्यां कृषिगोरक्षग्रहणं वा
णिज्यस्यापि दर्शनार्थं हिंसाप्रायां भूमिषजंतुहिंसाबाहुल्यात् पराधीनां बलीवर्दाद्यधीनां वर्जयेदिति अतः
पाशुपाल्याद्यभावे कृषिः कार्येति निकृष्टत्वं क्षत्रियोपि वैश्यपादात्मे क्षत्रियस्याप्यान्मीयवृत्त्यभावे वैश्यस्य वृत्तिर
स्तीत्यवगम्यते ब्राह्मणस्य क्षत्रियस्य चान्मीयवृत्तेरसंभवे धर्मस्यजतो वैश्येन यद्विक्रेतव्यं द्रव्यजातं वक्ष्य
माणवर्ज्यमित्तनस्सर्वविक्रेयं वर्जनीयान्याह सरसान्॥ सर्वान्रसानपोहेत कृतान्नं च तिलैः सह अश्मनो
लवणं चैव पशवो ये च मानुषाः सर्वं च तांतवं रक्तं शाणक्षौमाविकानि च अपि चेत्स्युररक्तानि फलमूले तथौ
षधीः अपः शस्त्रं विषं मांसं सोमं गंधाश्च सर्वशः क्षीरं क्षौद्रं मधु घृतं तैलं दधि गुडं कुशान् आरण्यांश्च पशू

सर्वानदंष्ट्रिणश्च वयांसि च मद्यंमांसंचलाक्षांचसर्वांश्चैकशफांस्तथा कामसुत्पाद्यकृष्यांतु स्वयमेवकृषीवलः
६ ५ विक्रीणीततिलानशुद्धान्धर्मार्थमचिरस्थितान् अपोहेन नविक्रीणीत कृतान्नंसिद्धान्नं रसत्वेनैवलवणस्यापि
निषेधसिद्धौ विशेषेणनिषेधोदोषगौरवज्ञापनार्थः गावमन्यस्यापि यः यद्भिःषेधोव्याख्येयः तांतवंनंतुनिर्मितं
वस्त्रंकुसुमादिरक्तंवर्जयेत् शणक्षुमानंतुमयानि आविलोमजानिचः यद्यलोहितान्यपिभवेयुस्तथापिन
विक्रीणीत तथाफलमूलगुडूच्यादीनि विवर्जयेत् शस्त्रंलोहः गंधांश्च सर्वेषांगंधवंतिसर्वाणिकर्पूरादी
नि क्षौद्रंमाक्षिकंमधुतुमधूच्छिष्टं आरण्यानहस्त्यादीन् दंष्ट्रिणः सिंहादीन् वयांसिपक्षिणः लाक्षाजतुए
कशफान् अश्वादीन् कृषकः स्वयमेवकर्षणेन तिलानुत्पाद्य द्रव्यांतरेणामिश्रितान् उत्पत्त्यनंतरमेव न तुला
भार्थं कालांतरंप्रतीक्ष्यधर्मनिमित्तमपि छात्रोविक्रीणीत निषिद्धस्यापितिलविक्रयस्यधर्मार्थस्यापवादत्वमसवद ६

न्ति कुल्लूकभट्टः मनुः सद्यः पतति मांसेन लाक्षया लवणेन च त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् इतरे
षां तु पण्यानां विक्रयादिह कामतः ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति मांसादीनां विक्रयेऽब्राह्मणस्तत्क्ष
णादेव पतीतीति दोषगौरवज्ञापनार्थं पंचानामेव महापातकानां पातित्यहेतूनां वक्ष्यमाणत्वात् क्षीरविक्रयात्त्र्य
हेन शूद्रतां प्राप्नोतीति एतदपि दोषगौरवात्प्रायश्चित्तगौरवार्थं उक्तदोषेभ्यो मांसादिभ्योऽन्येषां प्रतिषिद्धानां पण्यानामिच्छा
तो न तु प्रमादाद्द्रव्यान्तरसंपन्नानां सप्तरात्रविक्रयेण वैश्यत्वं गच्छति मनुः जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः
न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् एतेनेत्यभिधाय सर्वेणेत्यभिधानात् ब्राह्मणगोचरतया निषिद्ध
त्वेनापि रसादिविक्रयेण वैश्यवज्जीवेत् न पुनः कदाचिद्ब्राह्मणजीविकामाश्रयेत् न केवलं क्षत्रियो यावदन्योपि

५ 5 मनुः वैश्यो जीवन् स्वधर्मेण शूद्रवृत्त्यापि वर्त्तयेत् अनाचरन्नकार्याणि निवर्त्तेनैव शक्तिमान् अशक्नुस्तु शुश्रूषां शूद्रः
कर्तुं द्विजन्मनां पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः वैश्यः स्ववृत्त्या जीवितुमशक्नुवन् शूद्रवृत्त्यापि द्विजा
तिशुश्रूषादिषादिभिर्वर्तेत निस्तीर्णापत्क शूद्रवृत्तितो निवर्तेत शूद्रो द्विजातिशुश्रूषां कर्तुमक्षमः क्षुद्वशात्तान्
सपुत्रकलत्रानः क्षणाविचले खननादिभिः कर्मभिर्जीवेत् महाभारते युधिष्ठिरं प्रति भीष्मवाक्यं नियतस्त्वं
रक्षाप्रश्नस्य सर्वमशेषतः यथा राज्यं समुत्पन्नमादौ कृतयुगे भवत् नैव राज्यं न राजासीन्न दंडो नैव दाण्डिकः
धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परं पाल्यमानास्तथान्योन्यं नरा धर्मेण भारत खेदं परमुपाजग्मुस्ततस्ता रा०प०
न्मोह आविशत् ते मोहवशमापन्ना मनुजा मनुजर्षभ प्रतिपत्तिविमोहाच्च धर्मस्तेषामनीनशत् नष्टायां प्रतिप ५

नौ तु मोहश्च ध्याननाशस्तथा लोभस्य वशमायत्ताः सर्वे भारत नस्तनमकामो नामापरस्तत्र समपद्यत वै प्रभो तांस्तु
कामवशमापन्नान्रागो नामाभिसंस्पृशत् अगम्यागमनं चैव वाच्यावाच्यं तथैव च भक्ष्याभक्ष्यं च राजेंद्र दोषा
दोषं च नात्यजन् ब्रह्मेत्यनुर्हनौ न चैव ततोध्यायसहस्राणां शतं चक्रे स्वबुद्धिजं यत्र धर्मस्तथैवार्थः कामश्चै
वाभिवर्णितः त्रिवर्ग इति विख्यातो गण एष स्वयंभुवा चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः दंडनीतिश्च
विपुला विद्यास्तत्र निदर्शिताः ततः संचिंत्य भगवान्देवो नारायणः प्रभुः तैजसं वै विरजसं सोसृजन्मानसं
सुतं विरजास्तु महाभाग प्रभुत्वं भुवि नैच्छत कीर्त्तिमांस्तस्य पुत्रोभूत्सोपि पंचातिगोभवत् कर्दमस्तस्य तु सु
तः सोप्यतप्यन्महत्तपः प्रजापतेः कर्दमानभिगम्यवै प्रतिपेदे महीराज्यमथेंद्रियवशोभवत् मृत्योस्तु दुहिता

6

राजन्मुनीयानामसमानसौप्रख्याता त्रिषुलोकेषु यासावेणमजीजनत् वृद्धर्मेषु राणे वेणोजाते सुसंस्थितेव

भूवांगोन घोतमः वेणोराजकुमारो सौ सदादर्पसमन्वितः प्राणैः प्रपीडयामाससर्वजंतून स्वभावतः गृहे गृ

हे गृहस्थानां वालानां क्षम संभ्रमान् वहून् वालानगुणैर्वध्वा चिक्षेपागाध पाथसि दुःसादिदुःखदं कुमेक

णस्सह रहस्तदालोकाः स्वपुत्रशोकादितमा राजानमब्रुवन् नेनपुत्रेण शान्तप्तो सौ राजा वाङ्गो वनंगतः अराजके

नतां राज्ये मुनयो वेणमुल्वणं स्थापयामासुरन्यं गरं हितं धर्मबुद्धितः स्वभावयोडको वेणो लब्ध्वा सिंहासनं पु

नः धर्मान्निषेधयामास वर्णाश्रमकुलोचितान् न यष्टव्यं न होतव्यं न दातव्यं द्विजाः क्वचिन् इति न्यवारयद्धर्मान्मे

रो वेणो षेण सर्वतः धर्मलोपभयाद्विप्रास्तं वेणं नास्तिकोत्तमं राज्ये स्वं न वितं ज्ञात्वा मीता इव मदाब्रुवन् मुनय ६

ऊचुः राजसिंहासनगेनो धर्मान् कस्माज्जिहाससि नास्ति धर्मान्यो वेद्धुः सर्ववर्णाश्रमस्य हि स क्रो धर्म्माजनो

स्मायुः सद्योभवन्तिनामयास्त्यक्तधर्मान्नृपात्कोपिनबिभेतिकदाचनत्यक्तधर्माणिभूपेनुप्रजाधर्मंपरित्यजेत् त्यक्तध
र्मेजनेभूत्तेधर्मेपुंसनतस्यत् यस्यस्त्रीनस्यनस्त्रीचगृहंयस्यनतद्गृहं अधर्मराजकोदेशोऽराजकोवाभयस्यमः
विष्णुर्नपूज्यतेयत्रसहिदेशोह्यराजकः अराजकेपरस्त्रीभीरमनेनुबलात्सरः ब्राह्मणः क्षत्रियांगच्छेत्क्षत्रियोब्राह्म
णीमपि एवमादिविरुद्धेनधर्मेणसंकरोभवत् संकरोनरकायैवकुलघ्नानांकुलस्यच एवंधर्मस्यवैसम्प्रदुष्टरा
ज्येभवन्तुतवेणउवाचश्रुतंवोनरकायापिसंकरोभवतिध्रुवं तस्मादहंकरिष्यामिसंकरानेवसर्वथाकी
दृशोदृश्यतेधर्मोभवत्स्वेवहिसंकरात् इत्युक्तातः पुरंराजामविशत्वशान्वितः विप्राश्चमनसोभूत्वाजग्मुस्तेहि
यथागतंबलात्कारणाब्राह्मण्यासंगमयत्नुक्षत्रियंप्रत्युत्पादयामासवेणोनास्तिकुउत्तमः द्विजक्षत्रियपत्नीसांचवै

६ श्यपत्न्यां च क्षत्रियं द्विजं वैश्यस्त्रियां चापि ब्राह्मण्यां वैश्यमसृजत् एवमन्येन तथान्येषां संगमप्यसंभूय तिः पुत्रानैत्र
७ नयामास वर्णसंकरकारकः संकीर्णायां च संकीर्णसंसमयन्ततोऽनपः चकारसंकरान्न्यानदैवात्सेनसम्भूय
तिः शूद्रायां वैश्यतो जज्ञे करणो नाम संकरः वैश्यायां ब्राह्मणाज्जातो अंबष्ठो गांधिको वणिक् कंसकारः शंख
कारौ ब्राह्मणात्संबभूवतुः मनुः क्षत्रियात् शूद्रकन्यायां क्रूराचारविहारवान् क्षत्रशूद्रवपुर्जज्ञे उग्रो नाम प्रजाप
ते कन्याग्रहणात् चऊढाया मित्थ्याहार्ये विज्ञाखेव विधिः स्मृतः इति याज्ञवल्क्येन स्फुटीकरणात् तेन क्षत्रि
यात् शूद्रकन्यायां ऊढायां क्रूरचेष्टः क्रूरकर्मरतिश्च क्षत्रशूद्रमयं उग्राख्यः पुत्रोऽजायत इत्यर्थः एवमेव कुल्लक
भट्टः वहद्द मेघरणो कुंभकारं मनुवायौ क्षत्रपत्न्यां बभूवतुः कर्मकारश्च दासश्च शूद्रान्नस्यां बभूवतुः वैश्या ६

द्भूवन्नृपज्ञा मागधो गोपएव च क्षत्रियान्शूद्रकन्यायां जातौ नापितमोदकौ ब्राह्मणान्शूद्रकन्यायां वा
रजीवी च भूवह ब्राह्मण्यां क्षत्रियात्सूतो मालाकारस्तथा सुने वैश्यात्तु शूद्रकन्यायां जातौ तांबूलितैलिकौ उ
त्तमाः संकरास्ते मध्यमान्यथ मे शृणु वैश्यायां करणाज्जातो तक्षा रजकएव च स्वर्णकारः स्वर्णवणिक्तस्मा
म्बष्टसंभवौ वैश्यायां गोपतो जातावाभीरतैलकारकौ गोयान्शूद्रागर्भजातो धीवरः शौण्डिकस्तथा मालाका
रात्तु संभूतो नटः श्रावकएव च मागधादपि शूद्रायां जातौ शंखरजालिकौ एते वै मध्यमाः प्रोक्ता अंत्यजान
पि मे शृणु वैश्यपत्न्यां स्वर्णकारान्म्लेच्छहिरजायत कुडवः स्वर्णवणिजो वैश्यपत्न्यां वभूवह शूद्राद्ब्राह्मणी
गर्भाद्चांडालस्य च संभवः आभीरद्वीपकन्यायां वरडः समजायत नशोभूद्वैश्यकन्यायां चर्मकारस्त्र शिल्प

८ विनघट्टजीवी मुरजकाद्वैश्यायां संबभूवह वैश्यायां तु तैलकाराद्द्रोलावाह्वी बभूवह धीवरादपि शूद्रायाम॰
४ स्त्रजा निर्वभूवहहन्यादयोन्यजाः प्रोक्ता वर्णाश्रमबहिष्कृताः शाकद्वीपान्सुपर्णेन चानीतो यः सदेवः शाकद्वी
जः सोभूत्तविख्यातो धरणीतले देवलाद्बुगणको जातो वैश्यायां वादकोपि च सुपर्णेन गरुडेन शाकद्वीपसमाह
राद्‌मालामध्ये जम्बुश्च स सैनेसक्षः शाल्मलकस्तथा कुशः क्रौंचस्ततः शाकोद्वीपाश्चंतेच पुष्करः वृहद्धर्मपु
राणो वेणस्य हांगात संभूतोम्लेच्छो नाम सुतोऽवरः पुलिंदः पुक्कशश्चैव खशो वैजवनस्तथा सूक्ष्मकांबोजश
वराः खरश्चेमादयः सुताः गतानदृष्टुस्त्र स्विगणा धर्मव्यतिक्रियोम्भवान् तं तु हं तु दुरात्मानं सर्वे तेज्रषयो यपु:
नेगत्वा तत्र दृष्ट्वा च क्रोधाविष्टा मुनीश्वराः आधावंतं वाक्यवज्रान्हुंकारेणाहनत्रुतं तस्माद्धुंकारनष्टस म ८

पित्रापाणियुग्मं कं पृथु मायं क्षितीशानं सर्वलोकमभावयन् जगत्स्वास्थंपनन तः प्रायजानेनारायणा
त्मनि सर्वैर्वैसिषिचुर्भूयं तन्मेव वप्रथुमामकं ततो जग्मुर्मुनिश्रेष्ठाः पृथुना विहितार्हणाः महाभारतेच भूयो
स्य दक्षिणं पाणिं ममंथुस्ते महर्षयः ततः पुरुषउमजोद्दिपेणोद्वापरः कवची बद्धनिस्त्रिंशः सशरः सशरास
नः वेदवेदांगविद्वैव धनुर्वेदे च पारगः तं दंडनीतिः सकला श्रिता राजन्नरोत्तमं बृहद्धर्मपुराणे जावालि
प्रतिव्यासवाक्यं अभिषिक्तः पृथू राज्ये धर्मेणापालयन्प्रजाः मनः स्वास्थ्यं मच प्राप पप्रच्छाह पर्भूसुरा
न पृथुरुवाच कथं मेमनसोऽस्वास्थ्यं राज्ये पालयतः प्रजाः निरन्ना वा प्रजाः कस्मान्न वृत्तिं यांति भूसुराः ब्रा
ह्मणा ऊचुः राजंस्तव पिता वेणः प्रक्षिप्त धर्मसंचयः वर्णानां संकरश्चक्रे वलादेषा निवारितः अधर्मसंभ

वास्लेवै संकरः पृथिवीतले वर्त्तैतद्दुःखेन अत्यन्तं आत्मानेकलुषीकृतः पृथ्वीनष्टारणात्क्षेमाप्रजाभ्यो नात्र

पु
१
दायिनी एतन्नेकथितं सर्वं यम्भवान्पृष्टवान्हि नः पृथुरुवाच संकराणां विधेयं किं केवला धर्मजन्मनां हंत

व्याख्याणीयावा केन भद्रवेदिह किं कर्त्तव्यं किन्नु पथ्यं वेणा कल्मषसंभवे केन शांतिर्भवेदूर्णां ब्रूत

मे विप्रसत्तमाः व्यास उवाच इत्युक्तास्ते मुनिगणाः पृथोर्वचनमुत्तमम् परमानंदसंपन्नाः पृथुं वचन

मब्रुवन्ब्राह्मणा ऊचुः राजेंद्र त्वं प्रभुरेको धनवान्नावशगाः प्रजाः अतः परं तु सांकर्यं निवर्त्तय न चान्य

था यथान्यजाति पुरुषा नान्यजातिसुतागताः अन्यास्त्रु संकरान्कुर्युस्तन्निवर्त्तय सर्वथा येनुजा

ता हि संकीर्णास्ते षाढ्ढनी स्त्रु कल्पय पेत्वनकर्मानुमर्यादां लंघयिष्यंति भूयते नेनेतुदंडा भवेत्सव पु

वध्याश्चपिनसंशयः व्यासउवाच एतनश्रुत्वावचस्तेषांपृथुःपृथुपराक्रमः सर्वांस्तुसंकरगणानाहूयेदंत
दाब्रवीनपृथुरुवाच कथंधैविकृताकाराः कुंचेलामलिनाननाः श्रीणीः सुदुर्बलापूर्वंकथंवेदेश्वरेणो
भिवःसंकरगउचुः चयंसर्वेशुभाकाराः सुचेलाविमलाननाः शुभत्राः सुबलाः सर्वेदृष्टिहीनः कथंभ
वानत्रयंवेणस्यसमाः सर्वेवेणेनप्रतिपालिताः वेणेनजनिताश्चापिसचासीद्राजसत्तमः ब्रह्मविद्वाद
योदेवानोमस्तोह्यधिकाः क्वविन व्यासउवाच श्रुत्वैवंवचनंसर्वेजहसुर्ब्राह्मणादयः राजाक्रोधसमावि
ष्टस्तानवंबंधकृतागसः नदानेपीडिनावद्धाम्लानवक्त्राः कुचेलकाः रक्षरक्षमहाबाहो इतिभाषाकुलान
नाः संकरगऊचुः राजंस्तवाज्ञावशगावयंसर्वेयथातथंसर्वेनोविकृताकारान शुभाकारानकुरुष्वच

धर्मात्मन्कल्पयास्माकं वर्णेवृत्तिंचनाभवं मूर्खीनांवेणवृद्धीनामपराधंक्षमस्वनः पृथुरुवाच अहोविप्रा
१० 10 महाभागाः पूर्वंधर्मेनिरूषकाः अमीषांवर्णवृत्यादिकल्पयध्वंयथोचितं व्यासउवाच इत्युक्तास्तृषयःस
र्वेपृथोरग्रजोमहात्मनः तेषांवृत्यादिकल्पयंध्वंयथोचितं व्यासउवाचइत्युक्तास्तां पूर्वंविनयान्विता नब्रा
ह्मणाऊचुः ॥ षट्त्रिंशत्तत्वालयः शूद्रापूर्वंभूतास्वसंकराः कः किंकरिष्यतिकर्मसततंनास्वशक्तितः क
र्मानुरूपनामानोपूर्वंसर्वेभविष्यथ व्यासउवाच इत्युक्तास्तेनदासर्वेब्राह्मणैः शास्त्रदर्शिनैः वक्तुमारे
भिरेविप्रांस्तत्रादौकारणोब्रवीत कारणउवाच वयंमूर्खाजातिहीनाः मत्ताभूम्याविशेषतः भवद्भिधा
स्तुसर्वज्ञाः कुरुध्वंतुयथोचितं व्यासउवाच एवंश्रुत्वातुवचनंतेषांतेमुनिसत्तमाः प्रहृष्टवदनाभूत्वा १०

राजानमिदमब्रुवन् ब्राह्मणाः अयं तु करणो नाम श्रीयुक्तो वर्त्तमानो सदा विनयाचारसंपन्नो वचनं शुभ
मुक्तवान् राजकार्य्यंकरोन्येषु नीतिज्ञो दृश्यते स्वयं ब्राह्मणो भक्तिमांश्चैव देवेष्वपि भवत्यपि एष एव हि
सच्छूद्रो भवसेवनं संप्रायः ब्राह्मणाश्च तमूचुर्वै वत्स तिष्ठेह भूतले राजकार्येषु कुशलो लिपिकर्मविशा
रदः अंवष्ठमुपक्रम्य पृष्टहृष्टमं गुणाणं व्यास उवाच इत्युक्ते द्विजगणाः स्वस्थाना सन्तुष्टस्वकौ नयोस्तुय
हा द्विमाद पावंतो द्विजानपः आयुर्वेदं तु स्वस्मै वैद्यनाम च प्रकल्पं आयुर्वेदात्परं नाम ह्यस्माकं वाच्य
मर्हन्ति वैश्यपद्मा भेषजानि कृत्वा दासस्य सर्वतः ब्राह्मणाः अयमम्बाभिधोप्यस्तु बलवान्साहसान्वि
तः पुत्रे कुशलता स्यास्तु स्वत्र वृत्तिमेहामते अयं पंच मागधो नाम नाम्नाभविनुमर्हति मागधश्च वाचनमोः

११ स्तु विप्रपादेभ्यो युद्धवृत्तिं न मांसासाधु हिं धर्म्मस्ततोन्यराजकर्मसु नियोजयन मांदेवाभूपालस्यप्रेऽधुना
॥ पुष्ठान्यक्षत्रधर्मेण मम जानिस्तु जीवनुब्राह्मणाऊचुः ब्रह्मक्षत्रवर्णयोस्त्वं वंदीभवंदीभव महामनेस्तु
तिपाठीश्लोकवन्का मर्वदा गुणावर्णोकुः लिसयामास चान्येषां वृत्तिं स विप्रसंचयः तं तु वायेवस्त्रस्य
षिंवणिजां गंधविक्रयं नापिते क्षौरकर्मस्याहो येलेखनमेव च लोहं तु कर्मकारेभ्यः आजीव्यं स
मकल्पयन् तैलिकेक्षुकरोदाज्ञां गुवाकविक्रये खलु तांबूलिम्यकरोदाज्ञां तांबूलविक्रये द्विजः
कुंभकारेभ्यदां शिल्पं ताम्रकांस्यादिकर्मणि अयोजयन् कंसकारं शंखभूषा च शंखके मोदकेषु
डकर्माणि मालाकारेण नः पर सर्वेषां देवपूजार्थं पुष्पाहरणकर्म च स्वर्णकारे स्वर्णरूप्यभूषणादि ११

निरूपणं तेषां तत्त्वपरीक्षायै कस्मिन्नः स्वर्णकोऽवणिक् गणकाय दद्युस्ते च ज्योतिः शास्त्राणि सर्वशः मनुः
सृतानुमस्वसारभ्यमंवयानां चिकित्सितं चंडालश्वपचानां तु बहिर्ग्रामान् प्रतिश्रयः अपपात्राश्च कर्त
व्या धनमेषां श्वगर्दभं वासांसि मृतचैलानि भिन्नभांडेषु भोजनं कार्ष्णायसमलङ्कारः परिव्रज्या च नि
त्यशः न तैः समयमन्विच्छेन्न पुरुषो धर्ममाचरन् व्यवहारो मिथस्तेषां विवाहः सदृशैः सह अन्नमेषां प
राधीनं देयं स्याद्भिन्नभाजने रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च दिवा चरेयुः कार्यार्थं चिह्निता राज
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च दिवा चरेयुः कार्यार्थं शासनैः अबांधवं शवं चैव निर्हरेयुरि
तिस्थितिः वध्यांश्च हन्युः सततं यथाशास्त्रं यथाज्ञया अपथराजप्रशंसा मनुः अराजके हि लोकेऽस्मिन्स

१२ 12

र्वतो विद्रुते भयात् रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः इन्द्रानिलयमेशानामग्नेश्च वरुणस्य च चं
द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः यस्मादेषां सुरेन्द्राणां मात्राभिर्निर्मितो नृपः तस्मादभिभवत्ये
व सर्वभूतानि तेजसा श्वसार्थः॥ यस्मादराजके जगति बलवद्भ्यस्तु भयात्सर्वतः प्रचलिते सर्वस्यास्य च
राचरस्य रक्षार्थं ब्रह्मा राजानं सृष्टवान् तस्मात्तेन रक्षणं कार्यं कथं सृष्टवानित्यत आह इन्द्रेत्यादि
इन्द्रादीनां मात्रांशं गृहीत्वा भूतानां रक्षार्थं राजानमसृजत् यस्मादिन्द्रादीनां देवश्रेष्ठानामंशेभ्यो नृ
पतिः सृष्टः तस्मादेष सर्वप्राणिनो वीर्येणातिशेते इति कुल्लूकभट्टः मनुः बालोऽपि नावमन्तव्यो इति भू
मिपः महती देवता ह्येषा नररूपेण तिष्ठति एकमेव दहत्यग्निर्नरं दुरुपसर्पिणं कुलं दहति राजाग्निः १२

सपशुद्रव्यसंचयं अस्यार्थः मनुष्य इति बुध्या बालोपि राजा नावमंतव्यः यस्मान्महतीयं काचिद्देवता मनुष्यरूपेणावतिष्ठते
राजेन देवतावज्ञया अधर्मीदयात् अदृष्टदोष उक्तः अत्र दृष्टमाह एकमेवेति योग्निसमीपमनवहितः सन् उपसर्पति स
दुरुपसर्पीति मेकमेवाग्निर्दहति न तत्पुत्रादिकं राजाग्निः पुत्रदारभ्रात्रादिरूपं कुलमेव गवादिपशुसुवर्णादिधनसंचय
सहितं सापराधस्य दहतीति मनुः यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः यश्च
तं द्वेष्टि संमोहात्स विनश्यत्यसंशयं तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः अस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्म
जं ब्रह्मतेजोमयं दंडमसृजत्पूर्वमीश्वरः दण्डमेव माह बृहस्पतिः वाग्दिग्दंडं वधश्चैव चतुर्धा कल्पितो दमः दण्डोऽयं दंडः
मनुः समीक्ष्य स धृतः सम्यक् सर्वा रंजयति प्रजाः असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः स दण्डः शास्त्रतः सम्यकृति

१३ ष्णापशधानुष्ठेयेणेह धनादिषु कृ नुः सर्वाः प्रजाः सानुरागाः करोति अविचार्य तु अर्थलोभादिना प्रयुक्तः सर्वास्त्रि
13 यन्त्यर्थं शूद्रान नाशयति सर्वेन इति द्वितीयार्थेन सं इंद्रस्यार्कस्य वातस्य यमस्य वरुणस्य चंद्रस्याग्नेः पृथिव्याश्च ते
जोवृत्तिं नृपश्चरेत वार्षिकांश्चतुरो मासान्यथेंद्रोऽभिप्रवर्षति तथाभिवर्षेत स्वं राष्ट्रं कामैरिंद्रव्रतं चरन् कामैः प्रजार
क्षणकामैः अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः तथाहरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् प्रविश्य सर्वभू
तानि यथा चरति मारुतः तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतं यथा यमः प्रियद्वेष्यौ काले प्राप्ते नियच्छति तथा राज्ञा
नियंतव्याः प्रजास्तद्धि यमव्रतं वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणं परिपू
र्णं यथा चंद्रं दृष्ट्वा हृष्यंति मानवाः तथा प्रकृतयो यस्मिन् स चांद्रव्रतिको नृपः प्रकृतयः प्रजाः यस्मिन् राज्ञि प्रता १३

पयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु दुष्टसामंतहिंस्रश्च तदाग्नेयं व्रतं स्मृतं दुष्टसामंतानां हिंस्रो भवेत् सामंताः प्रति
योगिनः सेनाश्रयः यथा सर्वाणि भूतानि धरा धारयते समं तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतं अथ छत्रलक्षणं
अग्निपुराणे हंसपक्षैर्विरचितं मयूरस्य शुकस्य वा पक्षैर्वापि बलाकानां कार्यं मिश्रयपक्षकैः अथ मंत्रिलक्षणं शु
चिना संधेन यथाशास्त्रानुसारिणा प्रणेतुं शक्यते दंडः ससहायेन धीमता ससहायेन मंत्रिणान्यथा धर्मज्ञं च कृतज्ञं
च नृपप्रकृतिमेव च अनुरक्तं स्थिरारंभं लघुमित्र प्रभाषणे मौलान शास्त्रविदः शूरानलब्धलक्षान कुलोद्भवान स
चिवान सप्त चाष्टौ वा कुर्वीत सुपरीक्षितान् बृहद्वासिष्ठे समस्तगुणजालानां मध्यात्मज्ञानमुत्तमं न द्विद्राजा भवेद्रा
जा न द्विमंत्री च मंत्रविन् अथ लेखकलक्षणं तत्र गरुडपुराणे मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेंद्रियः सर्वशा

स्वसमालोकी साधू राजन्श्लेखकः अपहृतलक्षणं हृतं चैवमकुर्वीत सर्वशास्त्रदं इंगिताकारचेष्टाज्ञं शुचिर्दक्षं
१८ 14 कुलोद्भवं इंगितमभिप्रायस्तद्वक्तवचनस्वरादिः आकारो देहधर्मः मुखप्रसादवैरूप्यादिः चेष्टा करोत्तोलनादिरअ
नुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् वपुष्मानानतभीर्वाग्मी हृ लेखो राज्ञः प्रशस्यते अथवा सलक्षणं धनुर्दुर्गं
महीदुर्गमब्दुर्गं वार्क्षमेव वा नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरं सर्वेषामनुप्रपन्नेन गिरिदुर्गं समाश्रयेत एकः श
तं योधयति प्राकारस्थो धनुर्धरः तस्मादायुधसंपन्नं धनधान्येन वाहनैः ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च न
दुर्गं स्वपथ धसुवर्णादि धनधान्यकारिनुरंगादिवाहनब्राह्मणक्षादिशिल्पियन्त्रयवसोदकसमृद्धं कुर्यानदस्य र्थंःम
हाभारते विशालान्राजमार्गांश्च कारयीत नराधिपः मांडागारायुधागारान्योधागारांश्च सर्वशः अथ्यागारान्गजा रा.म० १८

गाणान्बलाधिकबलानि च न जानुकश्चिपश्येन गुह्यमेनस्तु धिष्ठिर चतुर्विधांश्च वैद्यान्वै संगृह्णीयाद्विशेष
तः ॥ एम वैद्यामिषक्वैद्यांमंद्रा केदंशकस्तथानदा श्वनर्त्तनाश्चैवमल्लामायाविनस्तथा शोभयेयुः प्रव
रंमोदंयेश्च सर्वशः ॥ अथ राजधर्मः ॥ तत्र मनुः ॥ इंद्रियाणां जये योगं समातिष्ठेद्दिवानिशं जितेंद्रियो हि शक्नो
ति वशे स्थापयितुं प्रजाः ॥ वृक्षराङ्गीद्रियाणां विषयासक्तिवारणे सर्वकालं प्रयत्नं कुर्यात् यस्माज्जितेंद्रियः प्र
जानियंतुं शक्नोतीत्यर्थः ॥ मनुः ॥ दशकामसमुत्थानि तथाष्टौ क्रोधजानि तु व्यसनानि दुरंतानि प्रयत्नेन विव
र्जयेत ॥ कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ॥ वियुज्यतेर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥ मृगयाक्षो दिवा
घः परिवादस्त्रियो मदः ॥ तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं

वाग्दंडंजंचपारुष्यंक्रोधजापिगुणाष्टकः द्यूतं तानि दुःवसानानि अक्षोअक्षाद्दिक्रीडामदोमद्यपानजनितो
१५ 15 विकारः सौयेत्रिकं सौयं त्रिकं न त्रयं वा युक्तीनानिद्रीणि वृथाट्यावृथागमनं पैशुन्यमविज्ञानदोषाविष्करणं
साहसं साधोर्वधादिनानिग्रहः द्रोह स्तुयनावधः ईर्षा अन्यगुणासहिष्णुता अस्यूयापरगुणदोषावि-
ष्करणं अर्थदूषणमर्थानामपहरणंवाक्यादप्रमाक्रोशादिदंडपारुष्यंताडनादिनवादहीनविज्ञानि
सतां हस्ताल्कदाचन अससंधस्वस्समादधानससंधस्वप्रतिपादयेन श्रोत्रियं व्याधितान्तौ च बालवृद्धाववकिंच
नं महाकुलीनमार्यं च राजा संपूजयेत्सदा अभयस्यहि यो दाता स पूज्यः सततं नृपः योरक्षन्बलिमादत्ते
करं शुल्कं च पार्थिवः प्रतिभोगं च दंडं च स सद्यो नरकं व्रजेत् स्वराष्ट्रे न्यायवृत्तिस्याद्भृशदंडश्च शत्रुषु सुहृत्स्व १५

जिम्हत्विग्धेषु ब्राह्मणेषु क्षमापितृः अजिम्होऽकुटिलः मनुः संग्रामेष्वनिवृत्तित्वं प्रजानां चैव पालनं शुश्रूषा ब्रा
ह्मणानां च राज्ञः श्रेयस्करं परं समोत्तमाधमैराजा त्वाहूतः पालयन् प्रजाः न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मर
न् न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः कूटान्यायुधानि बहिः
काष्ठादिमयानि अन्तर्गूढनिशितशस्त्राणि तैः समरेषु ध्यमानः शत्रून्न हन्यात् नापि काष्ठाकारफलकै
र्बाणैर्नापि विषाक्तैर्नाप्यग्निप्रदीप्तफलकैरित्यर्थः मनुः न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिं न मुक्त
केशं नासीनं न तवास्मीतिवादिनं न सुप्तं न विसन्नाहं न नग्नं न निरायुधं नायुध्यमानं पश्यन्तं न परेण समा
गतं नायुद्धव्यसनप्राप्तं नार्तं नातिपरिक्षितं न भीतं न परावृत्तं सतां धर्ममनुस्मरन् अस्यार्थः स्वपरयष्टोऽरथ्यं

१६
16
न्यत्क्वास्त्रुलारूढं न हन्यान्न तथानं पुसकं कृताञ्जलिं मुक्तकेशं उपविष्टं त्वदीयोहमिति वादिनं सुप्तं मुक्तस
न्नाहं विवस्त्रं ज्ञनायुधं अयुध्यमानं प्रेक्षकं अन्येन सह युध्यमानं भग्नखड्गाद्यायुधं पुत्रशोकादिपिडितंव
हुमहापत्कुलं भीतं पराङ्मुखं च शिष्टक्षत्रियाणां धर्ममनुस्मरन्न हन्यात् इति ननु हन्यात्त्र्योजानुहूनं कर्णावि
दायदि हून स्यहंतानिरपमावित्रोन सचिवैः सह मनुः रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः सर्वद्रव्या
णि कुप्यं च यो यज्जयति तस्य तत् अस्यार्थे राज्ञः स्वामित्वात्सर्वे ग्रहे गोप्राप्तेन द पवादार्थमाह १ याश्वहस्तिछत्र
धनधान्यगवादि स्त्रियः सर्वाणि द्रव्याणि गुडलवणादीनि कुप्यं च सुवर्णरजतव्यतिरिक्तं ताम्रादि धनं यः प
यजित्वा यद्दानपतितस्येन स्वपति सुवर्णरजतभूमिरत्नाद्यनपकृष्टधनं तु राज्ञ एव समर्पणीयं न वर्धमेव १६

च यथाि गणानमिति कुल्लूकभट्टः मनुः नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु गूहेत्कूर्म इवांगानि रक्षेद्विव
रमात्मनः मनुः एवं विजयमानस्य येऽस्य स्युः परिपंथिनः तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः यदि ते न
तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः दंडेनैव प्रसह्यैतान् शनकैर्वशमानयेत् तथा यत्नं कुर्याद्यथास्य प्रकृतिभेदादि
रूपं छिद्रं शत्रुर्न जानाति शत्रोस्तु प्रकृतिभेदादिकं चारैर्जानीयात् यथा कूर्मो मुखचरणादीन्यात्मदेहे गोप
यति एवं राज्यांगानि अमात्यादीनि दानसंमानादिना रक्षेत् स्वोत्थप्रकृतिभेदादिरूपं छिद्रं जाने प्रयत्नतः प्रती
कारं कुर्यात् एवमुक्तप्रकारेण विजयप्रवृत्तस्य नृपस्य ये विजयविरोधिनो भवेयुस्तान्सर्वान्सामदानदंडभेदैर्व
शमानयेत् ते च विजयविरोधिनो यद्याद्यैस्त्रिभिरुपायैर्न निवर्तेरंस्तदा बलात् हिंसापमर्दनादिना युद्धेनैव शन

२८ 17 कैर्लघुगुरुक्रमेणदंडेनैववशीकुर्यान्मनुः यदाप्रहृष्टामन्येतसर्वास्तुप्रकृतीर्भृशं अत्युच्छ्रितंतथात्मानं
तदाकुर्वीतविग्रहं यदामन्येतभावेनहृष्टंपुष्टंबलंस्वकंपरस्यविपरीतंचतदायायाद्रिपूंप्रति यदातुस्यात्प
रिक्षीणोवाहनेनबलेनचतदासीतप्रयत्नेनशनकैःसांत्वयन्नरीन् मन्येतारिंयदाराजासर्वथाबलवत्तरं
तदाद्विधाबलंकृत्वासाधयेत्कार्यमात्मनःयदा:परबसीनमन्येतारिंयदाराजासर्वथाबलवरवलाशंनुगमनी
यतमोभवेत्तदातुसंश्रयेत्क्षिप्रंधार्मिकंबलिनंनृपं निग्रहंप्रकृतीनांचकुर्याद्योरिबलस्यचउपसेवेततं
नित्यंसर्वयत्नैर्गुरुंयथा सेनापतिबलाध्यक्षौसर्वदिक्षुनिवेशयेत् यतश्चभयमाशंकेत्प्राचींतांकल्पयेद्दि
शं बलाध्यक्षः सेनापतेः पतिः यतोयतोदिशः प्राचीं अग्रं गुल्मांश्चस्थापयेदाप्तान्कृतसंज्ञान्समंततःस्थाने १०

पुद्धेषु कुशलान् भीरूंश्च विकारिणः गुल्मान् सैन्यैकदेशान् कृतभेरीपटहशंखवादिसंकेतान् जित्वा संपूजयेद्देवा
न्ब्राह्मणांश्चैव धार्मिकान् मदघान्परिहारांश्च श्रावयेदभयानि च देवान् तद्देशस्थान् स्थापयेत् तत्र तद्वंश्य
कुर्यात्समयक्रियां समयक्रियामेवं कर्त्तव्यमिति नियमं मनुः अलब्धां चैव लिप्सेत लब्धं चैव प्रयत्नतः रक्षे
त्क्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् अयमर्थः अलब्धं यद्रस्य अपरयत्नात्मकं दंडेन लिप्सेत जितं च समव
वेक्षणेन रक्षेत् रक्षितं च वृद्ध्युपायेन वाणिज्यादिना वर्द्धयेत् वृद्धं च शास्त्रीयविभागेन पात्रेष्वोदघानेऽन्याय
प्रश्चिमे यामे कृतशौचः समाहितः हुत्वाग्नीन्ब्राह्मणानर्च्य प्रविशेत् शुभां सभां धर्मासनमधिष्ठाय संवीतांगः स
माहितः विनीतवेषाभरणः पश्येत कार्याणि कार्यिणां द्वयोस्त्रयाणां पंचानां मध्ये गुल्ममधिष्ठितं तथा ग्रामशता

१८ नां च कुर्याद्राष्ट्रस्य संग्रहं द्वयोर्ग्रामयोर्गुल्मं रक्षितपुरुषसमूहं प्रधानपुरुषाधिष्ठितं तथा ग्रामस्याधिपतिं कुर्या
18 द्दशग्रामपतिं तथा विंशतीशं शतेशं च सहस्रपतिमेव च ग्रामे दोषान्समुत्पन्नान् ग्रामिकः सहसा स्वयं
शंसेद्ग्रामे दशेशाय दशेशो विंशतीशिने विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् शंसेद्ग्रामशतेशस्तु सहस्रपतये
स्वयं नगरे नगरे चैवं कुर्यात् सर्वार्थचिंतनं महामात्येन गण्ठत्वानि वेश्मानि यं केवाप्यमलेयपेन निर्हरेत्तूनरणं
मासि चैत्रे वह्निभयात्तथा मक्कमेव तु भक्ष्याणि पाचयेत नरूधिपः न दिवा ज्वालयेदग्निं वर्ज्जयित्वाग्निहोत्रकं
कर्माणि च शालासु ज्वलेदग्निं सुरक्षितः याज्ञवल्क्यः राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र तु ब्राह्मणान्वृत्ति राम १
मद्ब्रूयात्स्वधर्मः पाल्यतामिति पुरे नगरे स्थानं धवलगृहादि न्यस्य स्थापयित्वा त्रैविद्यान् त्रयीसंपन्नान्ब्राह्मण १८

ह्रिरण्यादिप्रयुक्तं बृहस्पतिः शुचयो वेद धर्मज्ञा दांता दक्षाः कुलोद्भवाः सर्वकार्यप्रवीणाश्च कर्त्तव्याः सुमतयः द्वौ त्रयः
पंच वा कार्याः समूहहितवादिनः कर्त्तव्यं वचनं तेषां ग्रामश्रेणिगणादिभिः नियंनैमिहकं काम्यं शांतिकं पौष्टिकं त
यापौरणं कर्म कुर्युस्ते संदिग्धार्थे च निर्णयं ग्रामो ग्रामवासी समूहः श्रेणिः समानजातीयैकवृत्तिशिल्पिसमूहः ग
णो ब्राह्मणसमूहः गोतमः त्रयो वर्णा ब्राह्मणस्य निदेशवर्त्तिनः रन ब्राह्मणो धर्मान प्रब्रूयात राजा चानुशिष्यात निदेश
आज्ञा नारदः राजाप्यनर्वहिः सर्वीनाश्रमान परिपालयेन उपायैः शास्त्रविहितैश्चतुर्भिः प्रकृतीस्तथा योपे
वर्णी विहीयेत यस्वाद्देकमनुब्रवीत नतं दद्यात्स्तेनोमार्गात्प्रच्युतं स्थापयेत्पथिपथि स्वमार्गे मनुः प्रसराज्ञस्तु
विषये श्रोत्रियस्सीदति क्षुधानस्यापि तस्य क्षुधा राष्ट्रमचिरादवसीदति श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्प

१८ येन विषये देशे क्षुधा क्षुधया श्रुतमध्ययनं वृत्तं चरित्रं। मं० दातव्यं सर्व्ववर्णेभ्यो राजा चौरैर्हृतं धनं राजा तदुप
१७ भुंजानो चौरस्याप्नोति किल्बिषं मनुः जितेंद्रियो हि शक्नोति वशे स्थापयितुं प्रजाः तस्मात्सम इव स्वामी स्वयं हि श
क्नोति वशे स्थापयितुं प्रजाः तस्मात्सम इव स्वामी स्वयं हित्वाप्रियाप्रिये क्षंतव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां
नृणां बालवृद्धातुराणां च कुर्वता हितमात्मनः क्षिपतां श्रर्थिप्रत्यर्थिनां दुःखेनाक्षेपोक्तिं कुर्वता मनुः यजेत रा
राजा क्रतुर्विविधैराप्तदक्षिणैः धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च राजधर्मे दद्याद्राजा न याचेत्तय
जेन न च याजयेत् महाभारते निहन्युः सर्वतोदस्यून् कामान् कस्यचित्क्षमेत न प्रत्याहर्तुं न शक्यं यस्य तद्धनं
चौरैर्हृतं तु पदि स्वात्कोशात्तत् संप्रदेयं स्यात्तन शक्नोनोपजीविना सर्ववर्णैः सदा रक्ष्यं ब्रह्मस्वं ब्राह्मस्वं ब्राह्मणाः १८

स्तथानस्तेयंविषयेतेनयोपकुर्यात्द्विजातिषुब्रह्मस्वेरक्ष्यमाणेतुसर्वोभवतिरक्षितः तस्मात्तेषांप्रदानेनकृत
कृत्योभवेन्नरः वासिष्ठे सर्वाभिमतदानेनपूजनीयागुणान्विताः अपिजीवितदानेनगुणिनंपरिपालयेत् अ
नादेयंनाददीतपरिक्षीणोपिपार्थिवः नचादेयंसमृद्धोपिसूक्ष्ममप्यर्थमुत्सृजेत् राजधर्मे पुत्राद्वपितुर्द्रोहे
विषयेस्यवासिनः निर्भयविचरिष्यन्ति सराजाराजसत्तमः अगूढविभवायस्यपौराराष्ट्रनिवासिनः नयापन
पवेत्तारः सराजाराजसत्तमः गरुडपुराणे मनस्तापंनकुर्वीत आपदंप्राप्यपार्थिवः समबुद्धिः प्रसन्नात्मासु
खदुःखेसमोभवेत् लीलासुखाभिभोग्यानित्यजेदिहमहीपतिः भागवतेदशमस्कंधे स्वदत्तांपरदत्तांवा
ब्रह्मवृत्तिंहरेत्तुयः षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिः ब्रह्मेत्युपलक्षणं तथाचतत्रैवएकादशस्कं

२० 20 धेयः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः वृत्तिं स जायते विट्कृमिमानववर्षायुतायुतं मनुः मोहाद्राजा स्वराष्ट्रं

यः कर्षयत्यनवेक्षया सोचिराद्भ्रश्यते राज्याज्जीविताच्च सबांधवः शरीरकर्षणात्प्राणाः क्षीयंते प्राणिनां य

था न राज्ञामपि प्राणाः क्षीयंते राष्ट्रकर्षणात् अन्नयोरर्थेः यो राजाऽनवेक्षया शिष्टदुष्टज्ञानेन सर्वानेव स्व

राष्ट्रजनाननर्थान्नीयुयुह ग्रामारण्यादिदंडेन पीडयति स शीघ्रं राजवैराग्यप्रकृतिकोपाधर्मेण राजाराज्या-

ज्जीविताच्च पुत्रसहितो भ्रश्यते यथाऽऽहारविहारयोर्धोधिनाशरीरशोषणान्नप्राणाः क्षीयंते एवं राज्ञाम

पि राष्ट्रपीडनान्नप्रकृतिकोपादिना प्राणा विनश्यंति न स्यान्नस्वशरीरवृत्तराज्ञा राष्ट्रं रक्षणीयं इत्युक्तं मनुः

तीक्ष्णश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः तीक्ष्णश्चैव मृदुश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः तीक्ष्णश्चै २०

वमहेन्द्रश्चैवमहेन्द्रस्य सा कार्यं क्ष महीपतिः नीत्या श्चैव महेन्द्रश्चैव राजा भवति संमतः कार्य्यविशेषमवमवगम्य कुर्व्वि-
कार्येत्तीक्ष्णाः कश्चिद्व महेन्द्रस्य भूयो भवति यस्मात्कुर्वन्स्यो राजा सर्वेषामभिमतो भवतीत्यर्थः मनुः विक्रोशंन्त्यो यस्य
राष्ट्राद्ध्रियंते दस्युभिः प्रजाः संपश्यतः सभृत्यस्य मृतः स न स जीवति यस्य राज्ञोऽमात्यादिसहितस्य पश्यतः सर्वरा-
ष्ट्राद्वाक्रोशंन्त्यः प्रजास्तस्करादिभिर्ह्रियन्ते स मृत एव न जीवति जीवनकार्याभावान्जीवन्नपि तस्य मरणमेवेत्यर्थः
मनुः गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः अरण्ये निःशलोके वा मंत्रयेदविभावितः निर्दंन्येवमहामंत्रैर्नैया
योनास्तथैव च पृष्ठे व विशेषेणान्तस्मात्तस्मान्नादतो भवेत् मंध्यंदिनेर्द्धरात्रे च विश्रान्तो धिलभः चिंतयेद्धर्म
कामार्थान्सार्द्धं तैरेक एव वा निःशलाके विविक्तदेशे अविभावितः मन्त्रभेदकारिभिरनुपलक्षितः एवमना

२१ अधार्मिकत्वेनैवावमानिताः तैर्यज्ञो नाः शु कार्यः यस्मादेते मंत्रभिंन्नं दंति नस्सा नदपसारणोपलवानस्मान् विश्वां
२। नोधिगतविज्ञखेदः मनुः यस्य मंत्रेन जानंति समागम्यपृथग्जनाः सकृत्त्वां पृथिवीं भुंक्ते को महीनो पिपार्थिवः पथ
गन्ये देवीपुराणांवे श्यादिभवने यस्य गार्हं भुंजीत संयमी ब्रह्मचारीव्रतीमन्त्रजायते लोकसंक्षयः अथ यत्नत्वाद्दानप
दम॥ तत्राह नारदः॥ ऋणं देयमदेयं च येन यत्र यथा भवेत् दानग्रहणधर्माश्च ऋणादानमिति स्थितं ऋणं लाभ
निमित्तं यस्य दानग्रहणमिच्छति न तु कुसीदमिति ज्ञेयं तेन वृत्तिः कुसीदिनां स्थानं मूलधनावस्थानं लाभो वृद्धिः दा
नग्रहणपदे कर्मरूपेण दासादायेन मूलधनावस्थाने समेव यो लाभस्तदर्थं पहानेधनिकेन दीयमानं मूलधनं
अधमर्णेन च ग्रहणं तथा स्वीकरणं ग्रहमाणं यत्त दृणमित्यर्थः पर्यवस्यति च रत्नाकरादयोप्येवं कल्लाकृन्मेमुत्र रम॰
२१

वक्ष्यायाकरपस्वरूपगुणयोगात्सौणप्रयोगः अत एव वाशिष्ठ्यार्थं प्रयुक्तस्य न तत्र णत्वमिति मिश्राः। वृहस्पतिः कु
नस्तिनान्सीदन्नश्चैव निर्विशंकैः प्रगृह्यते चतुर्गुणं वाष्टगुणं कुसीदाख्यमृणं ततः कुत्सितात्सीदतश्चाधमर्णा
त्सकलं धनं यद्गृह्यते निर्विशंकैः [illegible]र्गुणं वेति वाक्यार्थः नात्र्कायां नेनद्वैगुण्यादिलाभः तस्मात्कु
सीदमृणमित्येव लक्षणं न त्वपूर्वोक्तनारदवचनेन स्फुटमेव शेषवचनं लवपयष्टुन्यजिमात्रम्प्रदर्शनपरमिति वं
देश्वरः। अदेयमिति यदुक्तं तदाह कात्यायनः। न स्त्रीभ्यो दासबालेभ्यः प्रदद्यात्किंचिदुद्धृतं दाना नलभते नतु नश्यो
वत्तं च यद्दत्तमुद्धृतमुद्धारं तदृणमिति यावत् तत्रापि विशेषयति वृहस्पतिः। परिपूर्णं गृहीत्वाधिं बंधं वा साधु लग्न
कं लेख्यारूढं साक्षिमद्वा तदृणं दद्यादनीमदायया विश्वासमेषामन्यसमकारणं आधिं बंधो नोग्याभोग्याधिरूपो

२२ नान्तः पुनरुक्तिः लग्नकः साधुलं तृणादस्थिथिनत्वस्थैर्येणानादः विश्रंभहेतुत्वावेनप्रतिभूराधिमेवच लिखितं सा
२२ क्षिणश्चद्वेम माणेयक्तिकारके विश्रंभः प्रयुक्तर्णप्राप्तिविश्वासः व्यक्तिरभिव्यक्तिः अथ वृद्धिः तत्र चतुःसुवर्णपरि
मितपणविंशतौ मासमासयन्त्ररूपसुवर्णएकोवृद्धिः वसिष्ठवचनप्रोक्तं वृद्धिं वार्द्धुषिके शृणु पंचमाषांस्तु विं
शत्यामेवं धर्मो न हीयत इति वसिष्ठवचनात् कुसीदवृद्धिधर्म्या विंशतेः पंचमाषिकी मासमिति गौतमीयाच्च ध
र्म्या शास्त्रानुमता माषः षोडशपत्तिकः माषो विंशतिभागस्तु पणस्य परिकीर्तित इति वाहस्पत्याच्च पणं सुवर्णं
श्चत्वार इमनेन चतुःसुवर्णस्य पणत्वाभिधानात् स च माषो विंशतिपणस्याशीतितमो भागस्तथा चाशीतितमो
भागो वृद्धिरिति फलितं नत्र सबंधके स्फुटीभविष्यति चेदमुपरिष्ठात् अशीतितमभागस्य वृद्धित्वं मनुरप्याह च २२

षिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्द्धिनीं अशीतिभागं गृह्णीयान्मासाद्वार्द्धुषिकः शते मासान्मासमनीत्य अ
शीतिभागं वृद्धिस्यान्मासि मासि सबंधके इति याज्ञवल्कीयान सबंधं एवं पंवृद्धिरिति स्थितिः मनिभूनिरा
धानयोर्विशेषयति व्यासः सबंधे भाग आशीतः षाष्ठभागसलग्नके निराधाने द्विशतकं मासलाभमुस
हृतः आशीतः अशीतितमः षाष्ठभागो अशीतितमभागस्य षष्ठेन भागेन दशरक्तिकमिति न सहितोऽशी
तितमभागः ततश्च विंशतिपणपरिमिते सुवर्णे नवतिरत्तिकात्मिका वृद्धिः निराधाने इत्याधानशब्दो लग्न
कसहिताधायरः तेन लग्नकबंधकारहिते द्विकं शतं शत सुवर्णे स्वमासे द्वौ सुवर्णौ वृद्धिः एतच्च ब्राह्मणावि
षयं अत एव क्षत्रियादेस्तु शतेषु त्रिकचतुष्कपंचकसुवर्णरूपमासवृद्धिमाह मनुः द्विकं त्रिकं चतुष्कं च

२३
23
पंचकंच शतं समं मासस्य वृद्धिं गृह्णीयात् वर्णानामनुपूर्वशः द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी स
वंधकात्सवर्ष्येवं वर्णक्रमेणोत्कर्षः तथा च ब्राह्मणेभ्यो वृद्धिः सार्द्धं क्षत्रिये सार्द्धा वैश्ये द्विगुणा शूद्रे सार्द्धं द्विगुणा
वृद्धिरिति स्थितं एतन्मनुवाक्यात् इत्थं प्रकारं वृद्धिं गृह्णतो वैश्यस्यापदि ब्राह्मणादीनां च नाधर्मः कारितादि
वृद्धिं गृह्णतः पुनः पीडाकरत्वात् धर्मः वैश्यातिरिक्तानां त्रयाणामनापदि तृभय वृद्धिं गृह्णतोऽधर्मः हारीतः
पुराणा पंचविंशत्यां मासे षष्पणा वृद्धिः एवं सद्विमासे ऋतुभिर्वर्षैर्द्विलक्षमायान्तं संतिष्ठेत न ग्राह्या धर्म्या वृद्धि
र्नान साधर्मोऽथ वमे पुरस्तात् शेडषपणाः तथा च पविंशतिकार्षापसोमासे ऽष्टपणा वृद्धिरेवं त्रमेणप्रति
मासे द्विकं शतं भवति सद्विमासे ऋतुभिः ऋतुर्वर्षैः पंचाशत्मासैर्द्विलक्षमायान्तं द्विगुणीभूतं सत्तिष्ठेत ततो २३

नवर्द्धनेधनमित्यर्थः॥ हारीतः॥ पुराणोयगणिकं मतिमासमित्येके एतन्मंकारंजाऽधमर्णविषयं चातुर्वर्ण्येद्विशत
कादीनांधर्मलाभिधानात् वृद्धिं विभजति बृहस्पतिः॥ वृद्धिश्चतुर्विधा प्रोक्ता पंचधान्यैः प्रकल्पिता षड्विधान्यैः
समाख्याता तत्त्वतस्तां निबोधत॥ कायिका कालिका चैव चक्रवृद्धिस्तथैव च॥ कारिता च शिखावृद्धिर्भोगला
भस्तथापरा॥ कायिकामाह व्यासः॥ दोहवाह्यकर्मयुता कायिका समुदाहृता॥ दोह्यं गवादि वाह्यं बलीवर्द्दा
दि मूलधनाविरोधिनी प्रत्यब्दे यपणान्तद्धादिरूयांवा सोक्त विरुद्धा कावृद्धिमाह नारदः॥ कायाविरोधि-
णी शश्वत्पणपणार्द्धाद्यात्तु कायिका॥ कायो मूलधनं तद्विरोधिनी तन्न नाशयति प्रत्यब्दं देयापणानद्वीऋ
मेण नित्यमुभाभ्यां व्यवस्थापिता सा नारदमते कायिका हलायुधस्तु पणार्द्धांमेत्यादि पणावाह्येति पठित्वाप

२६ णासमूलधनस्य यावद्द्वैगुण्यं तावन्मासशश्वद्धर्षि सहस्रमपिडं तमयौम वाह्यने प्राप्येते सा कायिकेति व्याख्यातवानत्र
२५ त्राप्याभोगलाभान्तर्गतात्वप रात्मद्विवे तिमिश्राः नारदः प्रतिमासं स्रवति या वृद्धिः सा कालिका मता वृद्धेरपि पुनर्वृद्धिश्च
क्रवृद्धिरुदाहृता यत्र वृद्धिरूपधनं दातुमशक्तो धमर्णः सवृद्धिकमिदं दास्यामीति स्वीकरोति तत्र या वृद्धिः सा चक्र
वृद्धिरित्यर्थः कारितावृद्धिमाह कात्यायनः ऋणिकेन तु या वृद्धिरधिका संप्रकीर्तिता आपत्कालकृता नित्यं दा
व्या सा तु कारिता अन्यथा कारिता वृद्धिर्न दातव्या कथंचन ऋणिकेन तत्र स्वकार्यं तया अप्रीति भागद्विशतात्मो
ऽधिकावृद्धिर्व्यवस्थापिता सा कारिता सा च देया अन्यथा बलेन स्वीकारितापि न दातव्या न देयेत्यर्थः प्रत्यहं गृह्यमा
णा वृद्धिः शिखावृद्धिरित्याह बृहस्पतिः प्रत्यहं गृह्यते या तु शिखावृद्धिस्तु सा मता शिखेव वर्द्धते नित्यं शिरश्छेदे विवर्त्ते २६

ते मूले देयेत्येवेषाधिग्वा वृद्धिः ततः स्वता भोगवृद्धिमाह स एव गृहीतस्तोमः सदुःक्षेवान् भोगलाभः प्रकीर्त्तितः
गृहस्य स्तोमः भाटकं शयनादि आधिक्रमानक्षेत्रान् प्रादुः शस्यादि अस्य चाधिभोगहेतुत्वं व्यतेउयलक्षणंचैवनन।
तथा च कात्यायनः आधिभोगस्त्वशेषो यो वृद्धिस्तु परिकल्पितः प्रयोगो यत्र चैवं स्यादाधिभोगः स उच्यते पुत्रादि
तस्य भोग एव वृद्धिरिति व्यवस्थाप्यन्नणाप्रयोगः कृतः तत्र या वृद्धिः सत्वशेषाधिभोग इत्यर्थः एष विशेषप्रतिबृ
हस्पतिः शिखावृद्धिं कापिकां च भोगलाभस्तथैव च धनी तावत्समादद्यात् यावन्मूलं न शोधितं एषु त्रिषु वृद्धिषु
णादिरूपापाः प्रमवृद्धेरधिकापि वृद्धिर्ग्राह्यवस्थाने ग्राह्येत्यर्थः आधिभोगातिरिक्तस्य त्रिपुरुषोर्द्धमदेयमाह या
ज्ञवल्क्यः रणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव च आधिस्तु भुज्यते तावद्यावत्तत्र प्रदीयते ए यं वृत्तगोकमयो

२५ त्रेणापि सर्वं धक्रमणं देयमिति पूर्वार्द्धस्यार्थः आधिधनं यावन्नहीयते तावद्दत्तमर्णैर्नानाधिस्त्विरमपि भुज्यते तेन
25 द्वैगुण्यादिमन्याकलनेपि वृद्धिर्भोगरूपा भवत्येवेति पूर्वार्द्धस्य तात्पर्यं उत्तमर्णोर द्वादिस्त्रयक्रम्य विस्मुः अन्यत्र
द्वीपं प्रविष्टायामपि तन्स्थावरमाधिं अनेन वचनात् अन्यत्र द्वीपं प्रविष्टायामिदं मयान्याज्यमित्येवं रूपाद्धनिकवचना
दृत्तेन स्वामो भोगद्वारा वृत्तेपि समन्वरदघात् इत्यर्थः अथाकृतवृद्धिः तत्र निष्कलमूलं गृहीत्वा अधमर्णो याचितोप
दत्वा पादृदिशं व्रजेत् तन्न दातव्यं धनं समासत्रयोपरि वृद्धिरित्याह कात्यायनः कृत्वोद्धारमदत्वा यो याचितस्तु दिशं व्रजे
त् ऊर्द्ध्वं मासत्रयात्तस्मात् तद्धनं वृद्धिमाप्नुयात् उद्धारं निष्कलमूलं पण्ये विशेषमाह स एव पण्यं गृहीत्वा यो मू
लमदत्वैव दिशं व्रजेत ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात् कात्यायनः निक्षेपकृद्धिशेषं चक्रे पं विक्रयमेव च २५

याच्यमानमदत्तं चेद्वर्द्धते पंचकं शतं वृद्धिशेषमित्यत्र कर्मधारय इति रत्नाकरः वृद्धेः शेषमिति मिश्राः क्रयः क्रयक्र
प्यं विक्रयो मूल्यं अत्रापि म्रनुत्रयमित्यनुवर्त्तते तेन न्यासे वृद्धिशेषपण्यमूल्ये च दत्ते याचिते ततः षण्मासानंतरं प
णपशते पंच पणात्मिका वृद्धिः शूद्रे गादेया द्विकं त्रिकं चतुष्कं च दद्यादिति प्रागुक्तवचनेनैव क्लृप्तत्वात् प्रीतिदत्ते वि
शेषमाह नित्यं प्रीतिदत्तं न वर्द्धेत यावन्न प्रतियाचितं याच्यमानं न चेद्दत्तं वर्द्धते पंचकं शतमिति प्रीत्याम
मितं दत्तं द्रव्यमपि वृद्धिमासत्रयोपरि प्रागुक्तमनुवचनेकमूलत्वात् प्रीतिदत्तेऽनाकारितापि वृद्धिः षण्मा
सात्परतः कुसीदं पिनदेयानदत्तं रचुदेयेत्याह नारदः न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित् अनाकारि
तमप्यूर्ध्वं वत्सरार्द्धात् विवर्द्धते दानमत्र समर्पणमात्रं अन्यथा मासत्रयोपरि संभवेन कान्या पत्याश्चविसे

धस्यानन्तथा योयावित्तमात्रायत्तद्दत्वादिशंवृजेनत्तस्यतुत्रयस्योपरिष्ठात्तद्धनंवृद्धिमामुयात यावित्तकम
२६ र्पितंदेशांतरगमनमविवक्षितंस्वदेशस्थोपि वायस्तुनदद्याद्याचितोसकृत् सतनज्ञाकारितंवृद्धिमविद्धि
२८ मपिवावहेनसर्वमिदंछद्मनादासंयाप्रनेज्ञेय पत्रछलंविनैवकार्पीतिशपारन्यत्रगनस्तत्रविशेषयुति
विस्मुवृद्धिंदद्युरक्कनामपिवत्सरातिक्रमेयथाविहितो वत्सरातिक्रमेयथाविहितोवत्सरार्द्धंहूंहूं अकृत्ता
मनवधारितोसर्वमिदंमूलनिक्षेपादिकंस्वामिनायाचितमदत्तंछद्मनाक्षेद्धोतंरं अछद्मनालब्दत्तमद्दो
त्तरंस्तुवर्द्धनेदत्तिसमुदायार्थः अथपरमवृद्धिः नत्वगोनमः चिरकालावस्थायांद्विगुणंप्रयोगस्यप्रभृक्त
स्यधनस्यकथितंद्विगुणसमपानिरिक्तसमयेपिद्विगुणमवतिपुनेइदंच्चुमंशपारावित्तिमिश्रमद्वाचा रामः
२६

र्थः सामान्यवचनप्रयोगविषयं चैतदिति स्लोकार्थः मणिमुक्ताप्रवालसुवर्णफलकैनविकानां चिरकालाव-
स्थाने पि द्वैगुण्याधिका वृद्धिर्न भवतीत्याह कात्यायनः मणिमुक्ताप्रवालानां सुवर्णरजतस्य च तिष्ठति द्वि-
गुणाधिका वृद्धिर्न भवतीत्यर्थः फलं फलोद्भवं कार्पासादि कीटभवं च स्यादि ऊर्णाविकं मेषभवं कुवलादि गावं
च प्रागुक्तगौतमवचनमेतत्परं अन्यथा मूलभूतनानाप्रकृतिकल्पनापत्तेरिति मिश्रमतमेवात्र ज्यायः धान्यादौ
विशेषयति मनुः कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता धान्ये शदे लवे वाह्ये नातिक्रामति पंचतां धान्ये व्रीहियवा-
दौ शदः शस्यं लवो लवनीयं लोमादि एतदपि ऊर्णाविकादतिरिक्तं मणिमुक्तेत्यादि प्रागुक्तवचनकथाक्लृप्तान्यवा-
ह्येगवादौ सकृत्स्य दौ पादानाम मण्यादौ द्विगुणैव धान्यादौ पंचगुणैव वृद्धिर्भवति एवं च प्रकृतद्रूहणोल्वधिकापीति

२८ मिश्राःतैलादौविशेषयतिव्यासःतैलानांचैवसर्वेषामघानामपिसर्पिषांवृद्धिरष्टगुणाप्रोक्तागुणास्सलवणास्य
२७ चगोनमःकुसीदंयश्चयजलोमक्षेत्रसद्वाह्यभुनातिक्रामपंचंगुणंअत्रयश्चजंधनंद्रुग्धादिधनानामाष्टगुणा
वृद्धेःप्रागुक्तत्वान्धान्येचतुर्गुणाप्रोक्ताशदवास्त्रलवेषुचकुप्यंसर्णंरूप्याभ्यामन्यत्ताम्रादिकंशदेधान्यातिक्र
क्षेत्रभवंफलादिशाकादौविशेषयतिवृहस्पतिःऊक्तोऽयंचगुणाद्यकेवीजक्षौमेषुगुणाःस्मृताःतथाविसुरस
स्याष्टगुणाअत्रपदंलवणादिपरंप्रागुक्तकात्यायनवृहस्पतिवचनैकवाक्यत्वात्अन्यरसेषुविशेषमाह
वसिष्ठःद्विगुणंहिरण्यंद्विगुणंधान्यंधान्येनैवरसाव्याख्याताःपुष्पफलानिचतणकाष्ठादौचिरकालेपिवृ
द्धभावमाहवृहस्पतिःतणकाष्ठेष्टकासूत्रकिण्वपर्णास्थिचर्मणांहेतिपुष्पफलानांचवृद्धिस्तुनविधीयतेवि २८

णं च सुराभूतबीजद्रव्यं अच्छिद्रं नववस्त्रादि च मेकं क्षस्सागरदिक्तिः हेमिरण्य धं पूर्वं त्र वृद्धि विशेषवत्तपापुण्य
फलयोर्विधिनाशानेन विरोधः सुलभङ्गद्धं भभेदेन परिहरणीयइति रत्नाकरः अनङ्गीकृतवृद्धसीकृतव
द्धिभ्योविरोधो निरसनीयइतिमिश्राः अत्र च प्रागुक्तवचनेषु धान्यानां द्विगुणत्रिगुणचतुर्गुणपंचगुणमु
क्तं तन्मूल्यानुसारेणवोद्धव्यं नथा चेयं व्यवस्था पत्रप्रयोगकालेग्रस्योत्सन्नेः प्राक यादृशं मूल्यं शस्यान्न
नेनदृंन स्माद्ल्पह्रासस्तत्र द्विगुणं यत्र नादृशस्थूलेत्तनोधिकह्रासस्तत्र त्रिगुणं यत्र नादृशस्थूलेननोप्य
धिकोह्रासस्तत्र चतुर्गुणं यत्र नादृशस्थूलेननोप्यधिकन मोह्रासस्तत्र पंचगुणत्वमितिमिश्रमहाचार्याः
प्रदानकाले मूल्यस्याधिक्ये प्रागुक्तक्रमेणाव्यवस्थितिलक्ष्मीधरः चंडेश्वरस्तु अधमर्णायकृष्टेगुणत्व मध्यागु

२९ णास्त्रोक्तषड्गुणान्तैव्यवस्थेति न विरोध इत्याह नन्वृद्धिकथनेन गणस्योश्रुति कालमात्र एव कालांतर
२४ स्यानुयायित्वानान्तथा च हारीतः नस्तो द्विगुणं न्यत्रिगुणमेव वर्द्धते मूल्यानुसारेण वृद्धिव्यवस्थां मुनिरप्याह
समुद्रयाने कुशला देशकालार्थदर्शिनः स्थापयन्ति यां वृद्धिं स तत्राधिगमं प्रति समुद्रयाने लाभातिशयं ज्ञा
त्वाधिकां कलां कुर्वन्ति मिश्राः नारदेप्युक्तं स्तणानां सार्वभौमो यं विनिवृद्धिकरः परः देशाचारस्थितिस्त्वन्या
यत्रर्णमधितिष्ठते द्विगुणं त्रिगुणं चैव तथान्यस्मिन् चतुर्गुणं तथाष्टगुणमन्यस्मिन्देशे देयं चतिष्ठति अ
न्यस्मिन्देशे यावत्प्राप्नुयात्लम्पने उत्पत्तेः प्राक्तावनैव प्रस्त्ववतुष्पमुपमनौ लब्धव्यमिति देशकालज्ञा
नं पश्चद्वैगुण्यादेलाभस्य न त्ववर्णक्रमेणो वास्तु अस्तु वामा सस्थानेन नूणां द्विवैरपि मासैस्तस्मो द्विगुणं नू २९

णापगमेऽनुत्रिगुणमिति विवादचिंतामणिः अथ वृद्धिनिषेधः विक्रय्यमूल्यं वेतनं न निक्षेपोत्तमसाहसा
दिरूपदण्डछलादिगृहीतधर्मानुद्देशदत्तानर्पितभूजादिजितेषु न वृद्धिः पण्यमूल्यं भृतिर्न्यासोदंडेष
श्चाभिहारितं याचितानाक्षिकपणावर्द्धंते नाविवक्षिताः इति नारदीयात् पण्यमूल्यं विक्रयमूल्यं भृतिर्वेत
नं न्यासो निक्षेपः पण्यमूल्यन्यासयोश्च याचितादंडान्ययोरूपादानं दंड उत्तमसाहसादिरूपः अभिहारि
तं छलादिना गृहीतं वृथादानं धर्ममनुद्दिश्यदत्तमनर्पितं आक्षिकपणा द्यूतेन जितं धनं अविवक्षिताः
उभाभ्यामपरिभाषिता वृद्धयः यदि उभाभ्यामेकेनापि वृद्धिः परिभाषिता स्यात्तदा स्यादेव स्त्रीधनादौ अधिशेष
यति संवर्त्तः न वृद्धिः स्त्रीधनं लभेत व्यपितं लाभे वृद्धौ निक्षेपे च तथा स्थिते याचितादत्तान्यस्मिन्संदिग्धेदे

२८ यथेमदेयं वेति संदेहास्पदे यत्नया निश्चिते पुनर्वृद्धिः यदि नस्यात्स्वयंकृता स्वयंकृतानुएघ्यपि देयेति स्मृत्वः भ
२७ र्तः पुत्रादीन पक्रमस्य स एवाह यदि स्नेहकृतरोऽमी यां ज्ञीधनं भक्षयेद्वला न सवृद्धिं पुनर्दाप्यः स्यात् विलयं चस
मामुपात्त न देव यद्यनुज्ञाप्य भक्षयेत्स्मीति पूर्वकं मूलमेव स दाप्यः स्यात् यद्दा स धनवान्भवेत् मथ्याव्यासः प्रा
ति भाव्यं भुक्तं वधुमगृहीतं च दिनस्तनः नवर्द्धते प्रपत्रस्य दमं श्लोकं प्रतिश्रुतं भुक्तं वंधो गोप्याधिः दिनस्तो
द्दानुप्रवर्जो धमर्णोनागृहीतधनं प्रपुत्रस्य त्रणिकवशागानस्यपश्चान्नमसाह स्यादिदमः प्रतिश्रुतं यथैश
लोकं दानुमंगीकृतं दिनस्तनोऽगृहीतमित्यर्थः विशेषकृपुतियाज्ञवल्क्यः दीयमानं न गृह्णाति प्रयुक्तं यत्स्वकं
धनं मध्यस्थस्थापितं तत्स्यान्न वर्द्धते न ततः परं तथा गोनमः भुक्ताधिर्नवर्धते दिनस्तोऽवरुद्धस्य च भुक्तस्या २९

धिर्गोप्याधिर्यस्य धनस्य हानिर्बुभुत्सन्या गोप्याधिरित्यर्थः धनं दित्सतो धमर्णस्य आवरुद्धस्य गृहीतधनर्णाभोक्तुमव
रुद्धस्य अधमर्णाच्चरे धनादाम्य वृद्धिर्न देया अयमाधिविधिः तत्र कतिधा आधिरित्यपेक्षायामाह बृहस्पतिः आ
धिर्द्विधः समाख्यातः सचापि कथ्यते चतुर्विधः जंगमः स्थावरश्चैव गोप्यो भोग्यस्तथैव च यादृच्छिकः सावधिश्च लेख्या
रूढोथ साक्षिमान् अत्र जंगमस्थावरादियुग्मचतुष्टयेन चतुर्विंशत्भेदेनाष्टत्वमिति कल्पतरुः नारदः उप
चारस्तथैवास्य लाभहानिर्विपर्यये प्रमादाद्धनिनस्तद्वदाधौ विकृतिमागते उपचारो रक्षणं अस्य आधेस्त
थैवोपचारये थैव स्थापनं तथैव रक्षणमित्यर्थः धनिनः प्रमादात् विपर्यये आधिनाशे विकृति रोगे भुग्नत्वादिकं
लब्धे धनिकस्य लाभहानिरित्यर्थः कात्यायनः गोप्याधिभोगिनो वृद्धिः सोपकारे च हापिते गोप्याधेस्ताम्रककस

हानिर्भोगेन भोक्तुर्धनिकस्य वृद्धिर्लभ्या सोपकारे वलीवर्दौ हानिरिति सम्यग्व्यवहारः ह्रासमनोनीनेतेन कस्याप्य
३० धेर्धनिकस्यैवर्णव्यवहारा ग्रसमलेनेत्यर्थः तथा मनुः यः स्वामिनामनुज्ञातमाधिं भुंक्ते विचक्षणः तेनार्द्धं वृद्धिर्मोक्त
व्या तस्य भोगस्य निष्कृतिः अकाममनुज्ञातमाधिं यः कर्म कारयेत भोक्ता कर्मफलं दाप्यो वृद्धिं वा लभते न स इति
कात्यायनीयात् अनिष्टतो भोगे सर्ववृद्धिहानिः गोप्याधिभोगे सर्ववृद्धिहानिरित्युक्तमस्य कतरविषयः अत्रोप
भोगे वृद्ध्यभावो दैवराजोपघातमन्तरेण विनष्टमाधिमुत्तमर्णो दद्यात् दैवोपघातमन्तरमस्य हादिमयत्नान्नये क्षुण्णं राजो
पघातराजप्रयः लाये क्षंडम यत्रैव स्वायत्ताधं विनाकृतमिति विवक्षितं यत्तु विनष्टे मूलहानिः स्याद्दैवराजक
तादृते इति नारदेन मूलहानिरित्युक्तं तदाधेरसाधेरदानपक्षे ज्ञेयमिति चंडेश्वराः ह्यह स्मृतिः जाति संवधिसुङ ३०

हामत्तं देयं संबंधकं अनेषां लग्नकोपतेलेख्यसाक्षियुतं तथा स्वेछ्या देयं हि रणं पुरस्य धान्यं तु सावधि देशस्थितिसामर्त्
तवांग्रहीतव्यं तथैव वृद्धिरणप्रदानेऽवधौ स्वेछ्याद्रसादौ अवधेरवश्य कर्तव्यं समवेतेस्तु यद्दत्तं प्रार्थनीयं तथैव तत्र
न याचनेच यः स्थितलभमानं संयुक्तिहीयते राजबीजान्ययाद्युस्य क्षेत्रहानिः प्रजायते तेनैव साप्रतत्र सर्वेषां कृषि
जीविनां क्षेत्रहानिर्धनस्य विक्रयमप्याप्नोत्रेयुक्तितं तन्न स्थितिस्तैनैव खोटव्याजे याद्वृद्धस्यतिः भुद्गलाचारसारतां प्राप्ते
मूलहानिः प्रजायते बहुलं यत्र नष्टप्राणिकं तत्र तत्र नोच्यते अपसारतां प्राप्ते सर्वथाप्यवहारस्य क्षेम
त्वं बीजे वहुमूल्यं लभ्य धनायेक्षया ग्रासः ग्रहीत दोषनष्ट चवंधहे मादिकं भवेत् तस्मात् सलाभं संशोध्य तत्मू
ल्यं दाप्यते धनी तथाधनं तृणीकृत्य नस्त्वायस्याधिप्रार्थयेत् ऋणी तदेव तन्तस्य मोक्षव्या लभ्य या दोषवान् धीनीएतत्र

वधिविरहितभोग्यादिविषयं यथा याज्ञवल्क्यः उपस्थितस्य मोक्तव्य आधिस्तेयोऽन्यथा भवेत् प्रयोजकेसति धनं
३१ 31 कुले दत्वाधिमाप्नुयात् आधिम्यत्तेन्यायोपस्थितस्याधमर्णस्य धनिना धनं गृहीत्वा आधिर्मोक्तव्यः अमोचने
तु चौरवद्दण्ड्यः प्रयोजके आधिधनप्रयोक्तरि असति असन्निहिते कुलपुत्रादावाधिधनं दत्वाधमर्णः आधिं गृह्णी
तेत्यर्थः अथाधिसिद्धिः तत्र मनुः न चाधेः कालसंरोधान्न निसर्गो न विक्रयः कालसंरोधाच्चिरकालावस्थानान्न
निसर्गोत्रान्यत्र तदधिकृतदानेनाधीकरणं दानमिति हलायुधः न निसर्गो न विक्रयश्चोत्तमर्णेन कर्त्तव्य इति शेषः
केचित्तु उत्तमर्णस्य स्वत्वाभावेन प्रसक्त्यभावान्निषेधो न युक्तः अतः संरोधादवधिकालनियमनात् तदभ्यन्तरे स्वा
स्थानं स्यात् अधमर्णेन न निसर्गोऽन्यस्मै दानं विक्रयश्चाधेर्न कर्त्तव्य इति समुदितार्थ इत्याहुः आधीकृतस्य विक्रीतस्य ३१

विक्रयोनवलवानितिनुज्ञाद्गवधिरहिताधिपरं स्वनिर्मुक्तस्यैवाधेनष्टानं मत्वविक्रयइतिनिर्मूलं राजन्य
मनुवाक्यंभोग्याधिविषयमितिकल्पतरौप्रायोवादः न्यायसाम्यादकृतव्यवस्थाभोग्याधिविषयत्वस्यापि सं
भवात् कात्यायनः आधिमेकंद्वयोर्यस्तु कुर्यात्तत्कामतिकेस्मवेन द्वयोः पूर्वतरंग्राह्यसमाधानाचौरदंडभाक्स्व
त्रिपद्यवस्थापूर्वतरंपूर्वमाधानंग्राह्यमित्यर्थः तथाविष्णुः गोचर्ममात्रामपिभूमिमन्यस्याधीकृतांनस्याद्वि
मौच्यान्यस्य यः प्रयाद्दतिसवध्योनोचेत्तस्वर्णंषोडशयाद्दंड्यः उत्तराधिर्नसिद्ध्यतीत्यर्थः पारिजातादयोप्येवंगोच
र्मेपद्यार्थमाहुः विष्णुः एकोस्त्रीयाघड्डुसन्तनरः सांवत्सरंफलंगोचर्मन्त्रासाक्षोण्णीस्तोकावायपिवाबहुः आधेःसो
वीयपर्यसंदेहलाहपयोनिक्षिप्तम् आधिस्तोविवदेतांयदानयैयस्यभुक्तिर्जीयस्तस्यबलानकारंविनाभवेनतुल्य

३२ 32 कालोपभोगौचेद्भोगोपि समकोभवेन प्रदानेविक्रयेचैव विधिरेषःप्रकीर्त्तितः साम्यांविभज्यभोक्तव्यमिस
र्थः इदन्त्वाधेः पौर्वापर्यसंदेहेद्रष्टव्यं उभयत्र दृश्यमानतौल्ये अदृष्टेन निर्णय इतिमिश्राः भोगानुसारेण
चावस्थितिविश्वरूपधारेश्वरौ वृहस्पतिः क्षेत्रमेकं द्वयोर्बंधेदत्तं यत्तु समकालिकं येन भुक्तं भवेत्पूर्वं तस्य तत्
न सिद्धिमाप्नुयात समकालिकं पूर्वापरभूततयाऽशक्यावधारणं द्वाभ्यांवचनाभ्यांपूर्वापरभूततयाऽश
क्यावधारणेपसवलानकारणभूताभुक्तिः तत्प्राधिल्वं भवतीत्यर्थः यत्तु तन्नादृष्टो भोगस्तत्राह सर्वएवतुल्य
कालोपस्थितयोर्द्वयोरपि समं भवेत् प्रदानेविक्रयेचैवविधिः सम्प्रकीर्त्तितः यत्रैव क्रियासाक्षिमती अन्या
वलेख्यं तत्रापहारकं अपहारकं वलवत् आधिलादिसाधकमितिपावत् एकक्रियानिबंधेन एकस्यैव स्वः ३२

क्रियापुनिर्वंधेनलेख्यविशेषहेतुनेन्यर्णेनयाथानिर्दिष्टंचानिर्दिष्टमेकत्वचतुर्विशेषितंविशेषलिखि
तंज्यायद्दानिकान्यायनोन्नवीनइत्संनेनसामान्येनएकमेकत्राधीकृतंग्रन्थसिंधुनासेवनामचिह्नितंनत्रवि
रोधेसतिनामचिह्नितमाधिलंमजनतन्यक्तंनथावलात्कामंयत्राधिमनिर्दिष्टमवेश्यायेनपामुपान्त्या-
हंसपूर्वमाधानाचाधिमाप्रयानयत्राहिनक्षेत्रादिरधिकमपिक्षेत्रादिवलाद्दोधोमवेश्यधनिकोमुक्तेत्त्वा
मोदंद्यः अधाता मणमदलैवाधिकृतंक्षेत्रादिलभनतन्यर्थः कतिविधःप्रतिभूरित्याह बृहस्पतिः दर्शे
नेप्रत्ययेदानेऋणेद्रव्यार्पणेनयाचतुःप्रकारःप्रतिभूःशास्त्रदृष्टोमनीषिभिः आद्येहैकेदर्शयामेनंसाधु
रेषोपयेत्र्वीनदानाहमेनद्विविणंवर्शयाम्यपरेत्र्वीनऋणदानेइतिसंबंधः अपेणमत्रयाचिनकवि

३३ 33 षंपत्तेनयत्नकेनविश्वास्यर्थनीतंत्रायपरोवदद्तियच्चयंनानीयार्थेप्रतित्तदासमर्प्यार्थ्यणीयमितिनेन
त्रार्थ्यणमात्रंनदानंभ्रूरणोनुदानमेवहृष्योरितिभेदः सप्रदानस्तुन्स्रशोद्ध्वार्थ्यणोन्स्रणाद्ध्वस्मध
निकापार्प्यणाङ्नाहप्रतिभूभेदेनव्यवस्थाभेदमाहसत्यवश्राद्धौनुवितथेदाप्योनन्कालविदि
तंधनंदाप्योतत्तनैनुविसंवादेस्वरसेनदानविरहेऽन्यर्पणेवानोविनाशान्स्वग्रकर्पणालग्नको
विनाननसुतावपिदाप्यो याज्ञवल्क्यः दर्शनप्रतिभूर्यत्रमृतःप्रत्ययिकोपिवानतस्सुतास्रणांस्तु
ईद्युर्दानाययेस्थिताः दानार्पणप्रतिमूलेनयेस्थितानतस्सुतादद्युरित्यर्थः दर्शनप्रतिभूर्यत्रदेशे
कालेवाहर्शनंकारयितुंस्वीकृतवानतत्रराजदैवोपघातसंतरेणादर्शयन्प्रतिभूर्धनंदद्यादिमा ३३

हकात्यायनः दर्शनप्रतिभूर्यत्र काले देशे न दर्शयेत् निबंधमाहरेत्तत्र दैवराजकृताद्दृते काले व्यतीते प्र
तिभूर्यदि नैव दर्शयेत् निबंधं दाप्यते तत्र प्रेते चैव विधिस्मृतः प्रेते ऽपि योगि निदर्शनावधिमतिक्र
मप्रमते यदि बंधकं गृहीत्वा दर्शनप्रतिभूः स भूत्त दाननपुत्रोपि दाप्यः गृहीत्वा बंधकं यत्र दर्शनस्याहि
